सनातनजैनग्रंथमाला

१

स्याद्वादपतिश्रीविद्यानंदस्वामिविरचिता-

# प्रमाणपरीक्षा ।

जयंति निर्जिताशेषसर्वथैकांतनीतयः ।
सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः ॥ १ ॥

अथ प्रमाण-परीक्षा—तत्र प्रमाणलक्षणं परीक्ष्यते—

'सम्यग्ज्ञानं प्रमाणं प्रमाणत्वान्यथानुपपत्तेः। सन्निकर्षादिरज्ञानमपि प्रमाणं स्वार्थप्रमितौ साधकतमत्वात् ? इति नाशंकनीयं। तस्य स्वप्रमितौ साधकतमत्वासंभावात्। न ह्यचेतनोऽर्थः स्वप्रमितौ करणं पटादिवत्। सोऽर्थप्रमितौ करणमित्यप्यनालोचितवचनं नैयायिकानां स्वप्रमितावसाधकतमस्यार्थप्रमितौ साधकतमत्वानुपपत्तेः। तथाहि— न सन्निकर्षादिरर्थप्रमितौ साधकतमः स्वप्रमितावसाधकतमत्वात्पटवत्। प्रदीपादिभिर्व्यभिचारः साधनस्य ? इति न मंतव्यं। तेषामर्थपरिच्छित्तावकरणत्वात्। तत्र नयनमनसोरेव करणतया स्वयमभिमतत्वात्। प्रदीपादीनां तत्सहकारितयोपचारतः करणव्यवहारानुसरणात्। न चोपचारतोऽर्थप्रकाशन एव प्रदीपादिः करणं न पुनः स्वप्रकाशन इति मन्यमानो निर्मलमना मनीषिभिः, अनुमन्यते। नयानादेः-अर्थसंवेदनमिव प्रदीपादिसंवेदनमप्युपजनयतः प्रदीपादीनां सहकारित्वाविशेषात्। तेषामर्थप्रकाशनवत् स्वप्रकाशनेऽपि करणतोपचारव्यवस्थितेः। नयनादिना-अनेकांत इत्यपि न मननीयं तस्याप्युपकरणरूपस्याचेतनस्वभावस्यार्थप्रतिपत्तौ करणतोपचारात्। परमार्थतो भावेंद्रियस्यैव-अर्थग्रहणशक्तिलक्षणस्य साधकतमतया करणताध्यवसनात्। न चैतदसिद्धं विशुद्धधिषणजनमनसि युक्तियुक्ततया परिवर्तमानत्वात्। तथाहि—

'यदसन्निधाने कारकांतरसन्निधानेऽपि यन्नोपपद्यते तत् तत्करणकं। यथा कुठारासन्निधाने काष्ठछेदनमनुत्पद्यमानं कुठारकरणकं। नोत्पद्यते च भावेंद्रियासमवधानेऽर्थसंवेदनमुपकरणसद्भावेऽपि, इति तद्भावेंद्रियकरणकं। बहिःकरणसन्निकर्षाधीनतायां हि पदार्थसंवेदनस्य, नयनसन्निकर्षात् कलश इव नभसि नायनसंवेदनोदयः कुतो न भवेत् ?। न हि नयननभसोरन्यतरकर्मजः संयोगो न विद्यते एवेति वक्तुं युक्तं सकलमूर्तिमद्द्रव्यसंयोगान्नभसि सर्वगतत्वसाधनविरोधात्। न च नयनममूर्तिमदेव ? तस्य परैर्भौतिकतयोपगतत्वात्। पौद्गलिकतयास्माभिरुपकरणस्याभिमतत्वात्। ननु नभसि नयनसन्निकर्षस्य योग्यताविरहान्न संवेदननिमित्तता ? इत्यपि न साधीयः तद्योग्यताया एव साधकतमत्वानुषंगात्। का चेयं सन्निकर्षस्य योग्यता नाम ? विशिष्टा शक्तिरिति चेत् ? सा तर्हि सहकारिसन्निधिलक्षणा अनुमंतव्या।